मनः
मनः

माधवकः २ मधु ३ माध्वीकम् ४ । इत्यमरः । २ । १०।४१ ॥ ( यथा, सुश्रुते ४५ अध्याये ।
"सुखप्रियः स्थिरमदो विज्ञेयोऽनिलनाशनः ।
मधु मध्वासवश्छेदी मेहकुष्ठविषापहः ॥"
विवरणमस्य माध्वीकशब्दे ज्ञातव्यम् ॥ )

मध्वासवनिकः, पुं. ( मध्वासवनमुत्पाद्यत्वेनास्त्यस्येति । मध्वासवन + ठन् । ) शौण्डिकः । इति शब्दमाला ॥

मध्विजा, स्त्री, ( मधु ईजते प्राप्नोति कारणत्वेनेति । ईज + कः । पृषोदरादित्वात् ह्रस्वः । ) मदिरा । इति हेमचन्द्रः ।३।५६७ ॥ ( गुणादिविषयोऽस्या मदिराशब्दे ज्ञातव्यः ॥ )

मन, अर्च्चे । गर्व्वे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-गर्व्वे अक०-सेट् । ) मनति । इति दुर्गादासः ॥

मन, क ङ गर्व्वे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-अक०-स्तम्भने सक०-सेट् ।) क ङ, मानयते । गर्व्वोऽहङ्कारः । मनस्तम्भने । इति प्राञ्चः । मानयते शत्रुं वली स्तम्भनातीत्यर्थः । इति रमानाथः । इति दुर्गादासः ॥

मन, तृ क धृतौ । इति कविकल्पद्रुमः ॥ ( अदन्तचुरा०-पर०-सक०-सेट् । ) दन्त्यनोपधः । मनयति । इति दुर्गादासः ॥

मन, द ङ बोधे । इति कविकल्पद्रुमः ॥ ( तना०-आत्म०-सक०-सेट् । ) द ङ, मनुते । इति दुर्गादासः ॥

मन, य औ ङ बोधे । इति कविकल्पद्रुमः ॥ ( दिवा-आत्म०-सक०-अनिट् । ) य ङ, मन्यते । औ, अमंस्त । इति दुर्गादासः ॥

मनआपः, त्रि, ( आप्नोतीति । आप् + अच् । मनस आपः । ) मनोज्ञः । इति त्रिकाण्डशेषः ॥

मनः, पुं, ( मन्यते सुरभित्वादिगुणेन आद्रियत इति । मन् + घः । ) जटामांसी । इति शब्दचन्द्रिका ॥

मनः, [ स् ] क्ली, ( मन्यते बुध्यतेऽनेनेति । मन् + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४ । १८८ । इति असुन् । ) लिङ्गशरीरावयवविशेषः । यथा । सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्म्मेन्द्रियपञ्चकं वायुपञ्चकञ्चेति । मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः । मनस्तु कर्म्मेन्द्रियैः सहितं सत् मनोमयकोशो भवति । इति वेदान्तसारः ॥ ज्ञानेन्द्रियविशेषः । तत्तु बुद्धीन्द्रियाणां मध्ये प्रधानं श्रीकृष्णविभूतिश्च । यथा,—
"इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥"
इति भगवद्गीता ॥
तच्च गर्भस्थस्य सप्तमे मासि जायते । इति सुखबोधः ॥ ("पञ्चमे मनः प्रतिबुद्धतरं भवति ।" इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये ॥ * ॥ ) तत्पर्य्यायः । चित्तम् २ चेतः ३ हृदयम् ४ स्वान्तम् ५ हृत् ६ मानसम् ७ । इत्यमरः । १ । ४ । ३१ ॥ अनङ्गकम् ८ अङ्गम् ९ । इति शब्दरत्नावली ॥ अपि च ।
"मनो महान् मतिर्ब्रह्मा पूर्ब्बुद्धिः ख्यातिरीश्वरः ।
प्रज्ञा संवित् चितिश्चैव स्मृतिश्च परिपठ्यते ।
पर्य्यायवाचकाः शब्दा मनसः परिकीर्त्तिताः ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥
न्यायमते अस्य गुणाः । परत्वम् । अपरत्वम् । संख्या । परिमितिः । पृथक्त्वम् । संयोगः । विभागः । वेगश्च । मनोग्राह्याणि यथा । सुखम् । दुःखम् । इच्छा । द्वेषः । मतिः । यत्नश्च । इदं परमाणुस्वरूपम् । शिरोमणिमते वायवीयपरमाणुरूपम् । यथा,—
"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे ।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥
अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥"
इति भाषापरिच्छेदः ॥
जन्यज्ञानसामान्यं प्रति त्वङ्मनोयोगः कारणम् । यथा, तत्रैव ।
"त्वचो योगो मनसा ज्ञानकारणम् ॥"
तस्य नवगुणा यथा,—
"धैर्य्योपपत्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा ।
सदसच्चाशुता चैव मनसो नव वै गुणाः ॥"
इति मोक्षधर्म्मः ॥
अस्य व्याख्या । धैर्य्यम् १ उपपत्तिः ऊहापोहकौशलम् २ व्यक्तिः स्मरणम् ३ विसर्गः विपरीतसर्गो भ्रान्तिः ४ कल्पना मनोरथवृत्तिः ५ क्षमा ६ सत् वैराग्यादि ७ असत् रागद्वेषादि ८ आशुता अस्थिरत्वम् ९ । इति तट्टीका ॥ * ॥
अस्य चातुर्विध्यं यथा,—
"मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी ॥"
इति वेदान्तः ॥
तस्य अध्यात्मत्वादि यथा,—
"अध्यात्मं मन इत्याहुः पञ्चभूतात्मधारकम् ।
अधिभूतञ्च सङ्कल्पश्चन्द्रमाश्चाधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥
तस्य स्वरूपं यथा,—
"अनिरूप्यमदृश्यञ्च ज्ञानभेदं मनः स्मृतम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
तस्य प्राशस्त्याप्राशस्त्यानुमापकानि यथा,—
"जनानां हृदयं सद्यः सुव्यक्तं वचनेन वै ।
शिष्ये कलत्रे कन्यायां दौहित्रे बान्धवेऽपि च ॥
पुत्त्रे पौत्त्रे च वपुषि प्रतापे यशसि श्रियाम् ।
बुद्धौ वारिणि विद्यायां ज्ञायते हृदयं नृणाम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः ॥
तस्य बन्धमोक्षहेतुत्वं यथा,—
"मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धस्य विषयासङ्गि मुक्तेर्निर्व्विषयं तथा ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
( "अतीन्द्रियं पुनर्मनः सत्त्वसंज्ञकं चेत्याहुरेके तदर्थात्मसम्पदायत्तचेष्टम् । चेष्टाप्रत्ययभूतमिन्द्रियाणाम् । स्वार्थेन्द्रियार्थसङ्कल्पव्यभिचरणाच्चानेकमेकस्मिन् पुरुषे सत्त्वरजस्तमः सत्त्वगुणयोगाच्च न चानेकत्वं नानेकं ह्येककालमनेकेषु प्रवर्त्तते ॥ तस्मान्नैककाला सर्व्वेन्द्रियप्रवृत्तिः । यद्गुणञ्चाभीक्ष्णं पुरुषमनुवर्त्तते सत्त्वं तत्सत्त्वमेवोपदिशन्ति मुनयो बाहुल्यानुशयात् ॥ मनःपुरःसराणीन्द्रियाण्यर्थग्रहणसमर्थानि भवन्ति ॥"
"मनसस्तु चिन्त्यमर्थः । तत्र मनसो बुद्धेश्च त एव समानातिहीनमिथ्यायोगाः प्रकृतिविकृतिहेतवो भवन्ति ॥" इति चरके सूत्रस्थाने अष्टमेऽध्याये ॥
"लक्षणं मनसो ज्ञानस्याभावो भाव एव वा ।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षेण वर्त्तते ॥
वैवृत्त्यान्मनसो ज्ञानं सान्निध्यात्तच्च वर्त्तते ।
अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ ॥
चिन्त्यविचार्य्यमूह्यञ्च ध्येयं सङ्कल्प्यमेव च ।
यत्किञ्चिन्मनसो ज्ञेयं तत् सर्व्वं ह्यर्थसंज्ञकम् ॥
इन्द्रियाभिग्रहः कर्म्म मनसस्तस्य निग्रहः ।
ऊहो विचारश्च ततः परं बुद्धिः प्रवर्त्तते ॥
इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते ।
कल्प्यते मनसाप्यूर्द्ध्वं गुणतो दोषतो यथा ॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका ।
व्यवस्यते तथा वक्तुं कर्त्तुं वा बुद्धिपूर्व्वकम् ॥
या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्त्तते ।
याति सा तेन निर्द्देशं मनसा च मनोभवा ॥
बुद्धीन्द्रियमनोर्थानां विद्याद् योगधरं परम् ॥"
इति चरके शारीरस्थाने प्रथमेऽध्याये ॥
सत्त्वगुणयुक्तस्य मनसो गुणा यथा,—
"आस्तिक्यं प्रविभज्य भोजनमनुतापश्च तथ्यं वचो
मेधाबुद्धिधृतिक्षमाश्च करुणा ज्ञानञ्च निर्द्दम्भता ।
कर्म्मानिन्दितमस्पृहश्च विनयो धर्म्मः सदैवादरादेते सत्त्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः ॥"
अस्ति धर्म्ममोक्षपरलोकादिकमिति बुद्ध्या चरतीत्यास्तिकस्तस्य भाव आस्तिक्यं अनुतापः अक्रोधः धृतिः भूतप्रेतस्मरक्रोधलोभाद्यावेशराहित्यं ज्ञानमात्मज्ञानम् । निर्द्दम्भता कपटाभावः कर्म्म अनिन्दितं अस्पृहं निष्कामञ्च । रजोगुणयुक्तस्य मनसो गुणा यथा,—
"क्रोधस्ताडनशीलता च बहुलं दुःखं सुखेच्छाधिका
दम्भः कामुकताप्यलीकवचनं चाधीरताहङ्कृतिः ।
ऐश्वर्य्यादभिमानितातिशयितानन्दोऽधिकञ्चाटनं
प्रख्याता हि रजोगुणेन सहितस्यैते गुणाश्चेतसः ॥"